लैर्वेगैर्या हिक्का सम्प्रवर्त्तते । कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्दिशेत्”। क्षुद्रामाह “विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते । क्षुद्रिका नाम सा हिक्का जत्रुमूलं प्रधावति” । विकृष्टकालैः चिरेण । जत्रुः कक्षोरंसोः सन्धिः । गम्भीरामाह “नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता” । अनेकोपद्रववती तृष्णाज्वरादियुक्ता । महतीमाह “मर्माणि पीड़यन्तीव सततं या प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी” । मर्माणि वस्तिहृदयशिरःप्रभृतीनि । असाध्यत्वमाह “आयम्यते हिक्कितो यस्य देहो दृष्टिश्चोर्द्ध्वं ताम्यते नित्यमेव । क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ । आयम्यते विस्तार्य्यत इव तौ द्वाविति आयम्यत इत्यादिना नित्यमेवेत्यन्तेनैको हिक्कमानः । क्षीण इत्यादिनाऽतिमात्रमित्यन्तेनापरः । तौ द्वौ अन्त्यौ च गम्भीरया महतीहिक्कया हिक्कमानौ वर्जयेत् । अपरञ्च “अतिसञ्चितदोषस्य भक्तच्छेदकृशस्य च । व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः । आसां यासां समुत्पन्ना हिक्का हन्त्याशु जीवितम् । यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता” । साध्यत्वमाह “अक्षीणस्याप्यदीनस्य स्थिरधात्विन्द्रियस्य च । तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा” ।

**हिङ्गु** न० हिमं गच्छति गम–डु नि० । (हिङ्) रामठदेशोद्भवे वृक्षे अमरः यस्य निर्यासो हिङ्गुद्रव्यम् ।

“हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम् । शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम्” भावप्र० । “हिङ्गु तीक्ष्णं कटुरसं शूलाजीर्णविबन्धनुत् । लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित्” राजव०। २वंशपत्रे भावप्र०

**हिङ्गुनाड़िका** स्त्री हिङ्गुन नाड़ी इव नाड़ी यस्याः कप् । नाडीहिङ्गौ राजनि० ।

**हिङ्गुनिर्यास** पु० हिङ्गुन इव निर्यासोऽस्य । १निम्बवृक्षे अमरः ६त० । २हिङ्गुवृक्षनिर्यासे च (हिङ्) ।

**हिङ्गुपत्र** पु० हिङ्गुन इव पत्त्रमस्य । १इङ्गुदीवृक्षे राजनि० (हिङ्पात) २वृक्षभेदे स्त्री ङीप् भरतः।

**हिङ्गुपर्णी** स्त्री हिङ्गुन इव पर्णमस्याः गौरा० ङीष् । वंशपत्राम् रत्नमाला ।

**हिङ्गुल** पुंन० हिङ्गु तद्वर्णं लाति ला–क । रक्तवर्णे वर्णकद्रव्यभेदे अमरः २वार्त्ताक्यां ३इङ्गुद्याञ्च स्त्री ङीष् वर्णकभेदे तस्य शोधनादिकं भावप्र० उक्तं यथा

“मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् । सप्त वारान् प्रयत्नेन शुद्धिमायाति निश्चितम्” । एवं शोधितस्य हिङ्गुलस्य गुणाः । “तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलांश्च प्लीहामवातौ च गरं निहन्ति” । अथ हिङ्गुलात्रसाकर्षणविधिः “निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् । दृष्ट्वा दरदमूर्द्धन्तु पातयेत् सूतयुक्तिवत् । तत्रोर्द्ध्वपिठरीलग्नं गृह्णीयाद्रसमुत्तमम् । शुद्धमेव हितं सूतं सर्वकर्मसु योजयेत्” । तल्लक्षणं दरदशब्दे २४७१पृ० दृश्यम् । सतीदेहब्रह्मरन्ध्रपातस्थाने ४देशविशेषे स्त्री (हिङ्लाट) “ब्रह्मरन्ध्रं हिङ्गुलायां देवता भीमलोचना । कोटवी सा महामाया त्रिगुणा या दिगम्बरी” पीठमा० ।

**हिङ्गुलु** पुंन० हिङ्गु सदृशं लाति ला–डु । (हिङ्गुल) वर्णकद्रव्ये अमरः ।

**हिङ्गुसिराटिका** स्त्री हिङ्गुन इव सिरां पत्त्रसिरामटति अट–ण्वुल् अत इत्त्वम् । वंशपत्त्राम् रत्नमा० ।

**हिङ्गूल** न० हिङ्गुल+पृषो० । मधुरमूले (आलु) शब्दच० ।

**हिज्ज** पु० हिनोति हि–क्विप् तथा सन् जायते जन–ड कर्म० । हिज्जलवृक्षे शब्दर० । [भेदे (हिजल) जटा०

**हिज्जल** पु० हि–क्विप् हिः हितकारि जलं यस्य । वृक्ष-

**हिञ्जीर** पु० हस्तिपादबन्धे हेमच० । [अहिविशेष ।

**हिड** गतौ भ्रमणे भ्वा० आ० सक० सेट् इदित् । हिण्डते

**हिडिम्ब** पु० १राक्षसभेदे स हि भीमेन हतः २तद्भगिन्यां स्त्री

**हिडिम्बजित्** हिडिम्बं राक्षसभेदं जितवान् जि–क्विप् । भीमसेने हिडिम्बशत्रुप्रभृतयोऽप्यत्र । [भार० आ० ।

**हिडिम्बापति** पु० ६त० । १हनुमति शब्दर० २भीमसेने

**हिण्डन** न० हिडि–ल्युट् । १भ्रमणे २रमणे मेदि० । ३लेखने च विश्वः । [चार्य्ये हारा०

**हिण्डिक** पु० हिडि–इन् हिण्डौ कायति कै–क । गणा-

**हिण्डि(ण्डी)र** पु० हिडि–इरन् ईरन् वा । १समुद्रफेने अमरः । २वार्त्ताकौ ३पुरुषे मेदि० ४रुचके च उणा० ।

**हिण्डी** स्त्री हिडि–इन् ङीप् । दुर्गायां त्रिका० ।

**हिण्डीप्रियतम** पु० ६त० । शिवे शब्दर० हिण्डीपत्यादयोऽप्यत्र । [४मङ्गले च ।

**हित** त्रि० धा–क्त हि–क्त वा । १गते २पथ्ये ३इष्टसाधने

**हितक** पु० हित+स्वार्थे क । शिशौ राजनि० ।